**CLASS : 12th (Sr. Secondary)** **Code No. 2005**

**Series : SS-M/2017**

*रोल नं०* | | | | | | | | | | |

***SET : A***

# संस्कृत

## SANSKRIT

### *ACADEMIC/OPEN*

(Only for Fresh Candidates)

***(Evening Session)***

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशः –***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**



Download from www.MsEducationTv.com

**1.** अधोलिखितगद्यांशं पठित्वा निम्नांकितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखेयुः –

आसीत् धारानगर्यां भोजो नाम राजा। सिंहासनम् अधिष्ठितः सः सुप्रबन्धं स्वराज्यं समृद्धमकरोत्। तस्य राज्ये विद्यार्थिनः विद्याभ्यासं, विद्वांसः च अध्यापनं कुर्वन्ति स्म। धनिनः विपत्तौ निर्धनानां साहाय्यं कुर्वन्ति स्म। भोजः एतादृशः गुणग्राही आसीत् यत् यः कोऽपि विद्वान् राजसदसि स्वकीयां कवितां, नवीनम् आविष्कारं वा प्रस्तौति स्म तस्मै भूयांसं पुरस्कारम् अयच्छत्।

*प्रश्नाः* $5 \times 2 = 10$

(क) भोजो नाम राजा कुत्र आसीत् ?

(ख) धनिनः केषां सहायतां कुर्वन्ति स्म ?

(ग) भोजः किं समृद्धम् अकरोत् ?

(घ) भोजस्य राज्ये विद्याभ्यासं के कुर्वन्ति स्म ?

(ङ) भोजः कस्मै भूयांसं पुरस्कारम् अयच्छत् ?

**खण्डः 'ख'**

**(रचनात्मक–कार्यम्)**

**2.** विषयमेकमधिकृत्य लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) अनुशासनम्,

(ख) मम विद्यालयः,

(ग) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषाया सरलार्थं कार्यम् – 4



Download from www.MsEducationTv.com

(क) इदमेव च पुनः पुनरभिधीयसे – विद्वांसमपि, सचेतसमपि, महासत्त्वमपि, अभिजातमपि, धीरमपि, प्रयत्नवन्तमपि, पुरुषं दुर्विनीता खलीकरोति लक्ष्मीः।

**अथवा**

(ख) तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। एतेषां माहात्म्यम् - एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। द्वितीयरत्नेन भोजनादिकममृततुल्यमुत्पद्यते। तृतीयरत्नाच्चतुरङ्गबलं भवति। चतुर्थाद्रत्नाद्दिव्याभरणानि जायन्ते।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषाया सरलार्थं कार्यम् – 4

(क) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।

**अथवा**

(ख) विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्।।

**5.** अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) सुलभसौख्यमिदं बालत्वं भवति।

(ख) दिदेश कौत्साय समस्तमेतत्।

(ग) मनुष्याणां हिंसावृत्तिस्तु निरवधिः।

(घ) विगुणः कार्षापणः, कुत्सितश्च पुत्रः संकटे कदाचिदुपयुक्तो भवेत्।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

अस्माभिः पर्वताः शंकवः कृताः।

एतेषां सप्तद्वीपानां प्रत्येकमावेष्टनरूपाः सप्तसमुद्राः।



Download from www.MsEducationTv.com

***प्रश्नाः*** 2 × 1 = 2

(क) सप्तसमुद्राः केषाम् आवेष्टनरूपाः सन्ति ?

(ख) 'अस्माभिः' इति पदे कः शब्दः का विभक्तिश्च ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तरे लेखनीये –

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।

***प्रश्नाः*** 2 × 1 = 2

(क) जगत्सर्वं कीदृशम् अस्ति ?

(ख) 'सर्वम्' इति पदे कः शब्दः का विभक्तिश्च ?

**8.** रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 2 × 1 = 2

(क) शब्दैः प्रतीयते यद् गृहे चौरः अस्ति।

(ख) पशुहत्या तु तेषाम् आक्रीडनम्।

**खण्डः 'घ'**

**(संस्कृत-साहित्य–परिचयः)**

**9.** पं० हृषीकेशभट्टाचार्यस्य **अथवा** महाकवेः कालिदासस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 4

(i) समुद्रसङ्गमः,

(ii) श्रीमद्भगवद्गीता।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्रद्वयोः संस्कृतभाषया लक्षणोदाहरणौ लिखत – 2 × 4 = 8

(i) अनुष्टुप्,

(ii) वंशस्थः,

(iii) मन्दाक्रान्ता।

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8



Download from www.MsEducationTv.com

(i) अनुप्रासः,

(ii) उत्प्रेक्षा,

(iii) व्याजस्तुतिः।

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**13.** (क) स्वरसन्धेः **अथवा** विसर्गसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) कर्ताकारकस्य **अथवा** करणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) अव्ययीभावसमासस्य **अथवा** तत्पुरुष समासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**खण्डः 'छ'**

**[ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]**

**14.** अधस्तनप्रश्नानां लिखित्तोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 16 × 1 = 16

(क) 'अन्यथेतः' इति पदे कः सन्धिविच्छेदः ?

(i) अन्य + थेतः (ii) अन्यथा + इतः

(iii) अन्यथ + इतः (iv) अन्यथा + एतः

(ख) 'तत् + श्रुत्वा' इति पदे किं सन्धिपदम् ?

(i) तद्श्रुत्वा (ii) तत्श्रुत्वा

(iii) तच्छ्रुत्वा (iv) तत्छ्रुत्वा

(ग) 'सर्वापि' इति पदे का सन्धिः ?

(i) दीर्घसन्धिः (ii) वृद्धिसन्धिः

(iii) गुणसन्धिः (iv) यण्सन्धिः

(घ) 'पुष्पाञ्जलिः' इति पदे विग्रहोऽस्ति –



Download from www.MsEducationTv.com

(i) पुष्पाणां अञ्जलिः (ii) पुष्पेषु अञ्जलिः

(iii) पुष्पेभ्यः अञ्जलिः (iv) पुष्पाय अञ्जलिः

(ङ) 'महान्धकारः' इति पदे कः समासः ?

(i) कर्मधारयः (ii) द्विगुः

(iii) तत्पुरुषः (iv) बहुव्रीहिः

(च) 'महान् उत्साहः' इति विग्रहे किं समस्तपदम् ?

(i) महानुत्साहः (ii) महोत्साहः

(iii) माहोत्साहः (iv) महानोत्साहः

(छ) 'किम्, पुल्लिंग, द्वितीया, द्विवचने रूपम्' –

(i) के (ii) काम्

(iii) कौ (iv) कान्

(ज) 'वनानि' इति पदे का विभक्तिः ?

(i) प्रथमा (ii) तृतीया

(iii) चतुर्थी (iv) पंचमी

(झ) 'याचते' इति पदे कः धातुः ?

(i) यच्छ् (ii) यच्

(iii) यत् (iv) याच्

(ञ) 'परिभ्रमसि' इति पदे कः पुरुषः ?

(i) प्रथमपुरुषः (ii) उत्तमपुरुषः

(iii) मध्यमपुरुषः (iv) अन्यपुरुषः

(ट) 'कृतवान्' इति पदे कः प्रत्ययः ?

(i) क्त (ii) तल्

(iii) क्त्वा (iv) क्तवतु

(ठ) 'उत् + स्था + क्तः' एषां संयोगे किं रूपम् ?

(i) उत्तिष्ठ (ii) उत्तिष्ठत

(iii) उत्थितः (iv) स्थितः

(ड) 'सह' इति उपपदयोगे का विभक्तिः ?

(i) प्रथमा (ii) तृतीया



Download from www.MsEducationTv.com

(iii) चतुर्थी (iv) पंचमी

(ढ) 'शरीरम्' इति पदस्य समानार्थकपदमस्ति –

(i) कलुषम् (ii) पातकम्

(iii) अङ्गम् (iv) गात्रम्

(ण) 'पूर्वतनम्' इति पदस्य विशेष्यम् –

(i) त्वम् (ii) पत्रम्

(iii) प्राप्तम् (iv) आशाम्

(त) 'विद्वान्' इति पदस्य विलोमपदस्ति –

(i) युवा (ii) वृद्धः

(iii) मूर्खः (iv) बालकः



Download from www.MsEducationTv.com

**CLASS : 12th (Sr. Secondary)** **Code No. 2005**

**Series : SS-M/2017**

*रोल नं०* | | | | | | | | | | |

**SET : B**

# संस्कृत

## SANSKRIT

### *ACADEMIC/OPEN*

(Only for Fresh Candidates)

***(Evening Session)***

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशः —***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**



Download from www.MsEducationTv.com

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितगद्यांशं पठित्वा निम्नांकितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखेयुः –

नदी पर्वतेभ्यः निर्गत्य क्षेत्रेषु आगच्छति। प्रपातः तस्याः प्रथमावस्था अस्ति। शनैः शनैः सा सागरं प्रति गच्छति। तस्याः बालुकायुक्ततटेषु हरिताः तरवः भवन्ति। तेषां वृक्षाणामुपरि काकाः, चटकाः, शुकाः कोकिलाः च वसन्ति। पक्षिणां कलरवैः, बालकानां क्रीडाभिः, स्त्रीणां वार्तालापैः तस्याः तटाः गुञ्जायमानाः भवन्ति परं केचन जनाः अत्रागत्य मनोरञ्जनं कुर्वन्ति, खादन्ति, भोजनस्य अवशिष्टं च तस्याः जले एव पातयन्ति। एवं तस्याः जलं दूषितं भवति। दूषितं जलं स्वास्थ्याय अहितकरम् अस्ति। अतः जलं दूषितं न कर्तव्यम् यतः जलम् एव प्राणिनां जीवनम् अस्ति।

***प्रश्नाः*** $5 \times 2 = 10$

(क) नद्याः प्रथमावस्था का ?

(ख) नदी केभ्यः निर्गत्य क्षेत्रेषु आगच्छति ?

(ग) कीदृशं जलं स्वास्थ्याय अहितकरम् ?

(घ) नद्याः तटाः कथं गुञ्जायमानाः भवन्ति ?

(ङ) जलं केषां जीवनम् ?

**खण्डः 'ख'**

**(रचनात्मक–कार्यम्)**

**2.** विषयमेकमधिकृत्य लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) मम प्रियः कविः,

(ख) प्रातःकालीन भ्रमणम्,

(ग) संस्कृतभाषायाः महत्त्वम्।

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) तदतिकुटिलचेष्टादारुणे राज्यतन्त्रे अस्मिन् महामोहकारिणि च यौवने कुमार ! तथा प्रयतेथाः यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः।



Download from www.MsEducationTv.com

**अथवा**

(ख) स स्वल्पभाषी, अतस्तस्य मनः कथा मनोव्यथा वा बोधगम्या नास्ति। सन्तुलितो वार्त्तालापः, साक्षात्समये आगमनम्, ततः सञ्चिकासु मनोनिवेशः, कार्यं समाप्य स्वगृहं प्रत्यागमनञ्च तस्य वैशिष्ट्यमासीत्।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।

**अथवा**

(ख) केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्तु खलु भूषणानि सततं वाग्भूषणं भूषणम्।

**5.** अधोलिखिताषु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) न कर्म लिप्यते नरे।

(ख) सर्वक्षत्रपरिभावी महान् उत्कर्षनिकषः।

(ग) मानवा नाम सर्वासु सृष्टिधारासु निकृष्टतया सृष्टिः।

(घ) उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

इत्येवं विचार्य सर्वस्वदक्षिणं यज्ञं कर्त्तुमुपक्रान्तवान्। ततः शिल्पिभिरतीव मनोहरो मण्डपः कारितः। सर्वापि यज्ञसामग्री समहृता। देवमुनिगन्धर्वयक्षसिद्धादयश्च समाहूताः।

***प्रश्नाः*** $2 \times 1 = 2$

(क) यज्ञे के के समाहूताः ?

(ख) सर्वा इति पदे कः शब्दः का विभक्तिश्च ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तरे लेखनीये –

तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिस्ये।



Download from www.MsEducationTv.com

स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि।।

*प्रश्नाः* 2 × 1 = 2

(क) चातकोऽपि कं न याचते ?

(ख) 'अहम्' इति पदे का विभक्तिः किं वचनञ्च ?

**8.** रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत - 2 × 1 = 2

(क) स्वर्गभूमिं कुर्शीति वदन्ति।

(ख) असौ शिववीरचरः निजकार्यात् न विरमति।

**खण्डः 'घ'**

**(संस्कृत-साहित्य–परिचयः)**

**9.** पं० भट्ट मथुरानाथ शास्त्रिणः **अथवा** पं० अम्बिकादत्तव्यासस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः - 4

(i) रघुवंशम्,

(ii) ईशावास्योपनिषद्।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्रद्वयोः संस्कृतभाषया लक्षणोदाहरणौ लिखत — 2 × 4 = 8

(i) इन्द्रवज्रा,

(ii) मालिनी,

(iii) शार्दूलविक्रीडितम्।

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8

(i) उपमा,

(ii) रूपकः,

(iii) व्याजस्तुतिः।

**खण्डः 'च'**



Download from www.MsEducationTv.com

## (अनुप्रयुक्त-व्याकरणम्)

**13.** (क) दीर्घसन्धेः **अथवा** अयादिसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) कर्मकारकस्य **अथवा** अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) तत्पुरुषस्य **अथवा** द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

### खण्डः 'छ'

### [ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]

**14.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 16 × 1 = 16

(क) 'जहातीह' इति पदे कः सन्धिविच्छेदः ?

(i) जहाती + ह (ii) जहाति + इह

(iii) जहाति + ईह (iv) जहाती + ईह

(ख) 'तेन + एव' इति पदे किं सन्धिपदम् ?

(i) तेनेव (ii) तेनिव

(iii) तेनैव (iv) तेनव

(ग) 'यथेच्छम्' इति पदे का सन्धिः ?

(i) गुणसन्धिः (ii) दीर्घसन्धिः

(iii) यण्सन्धिः (iv) अयादिसन्धिः

(घ) 'अश्रुधारा' इति पदे विग्रहोऽस्ति –

(i) अश्रुः धारा (ii) अश्रूणां धारा

(iii) अश्रवः धारा (iv) अश्रूः धाराः

(ङ) 'प्रकृत्या सिद्धम्' इति विग्रहे किं समस्तपदम् ?

(i) प्रकृतीसिद्धम् (ii) प्रकृत्यासिद्धम्

(iii) प्रकृतिसिद्धम् (iv) प्रकृत्सिद्धम्

(च) 'कुलव्रतम्' अत्र कः समासः ?

(i) कर्मधारयः (ii) तत्पुरुषः

(iii) अव्ययीभावः (iv) बहुव्रीहिः



Download from www.MsEducationTv.com

(छ) सर्व, पुल्लिंग, द्वितीया, बहुवचने रूपम् -

(i) सर्वान् (ii) सर्वेभ्यः

(iii) सर्वे (iv) सर्वेण

(ज) 'राज्ञे' इति पदे का विभक्तिः ?

(i) पञ्चमी (ii) तृतीया

(iii) प्रथमा (iv) चतुर्थी

(झ) 'गृह्यताम्' इति पदे कः धातुः ?

(i) ग्रह् (ii) गृह्य

(iii) गृह् (iv) ग्रह्य

(ञ) 'आध्नन्ति' इति पदे कः पुरुषः ?

(i) प्रथमपुरुषः (ii) उत्तमपुरुषः

(iii) अन्यपुरुषः (iv) मध्यमपुरुषः

(ट) 'दोधूयमानाः' इति पदे कः प्रत्ययः ?

(i) मान् (ii) आन्

(iii) शानच् (iv) शतृ

(ठ) 'आ + गम् + ल्यप्' एषां संयोगे किं रूपम् ?

(i) आगमय (ii) आगत्य

(iii) आगतः (iv) आगमः

(ढ) 'दा' इति उपपदयोगे का विभक्तिः ?

(i) प्रथमा (ii) द्वितीया

(iii) चतुर्थी (iv) तृतीया

(ड) 'स्वर्गः' इति पदस्य समानार्थपदमस्ति –

(i) नरकः (ii) नाकः

(iii) कलुषम् (iv) पातकम्



Download from www.MsEducationTv.com

(ण) 'सन्तुलितः' इति पदस्य विशेष्यम् –

(i) व्यवहारः (ii) पत्रम्

(iii) जन्तवः (iv) शिशवः

(त) 'भयम्' इति पदस्य विलोमपदस्ति –

(i) सभयम् (ii) निर्भयम्

(iii) भयभीतः (iv) आभयम्



Download from www.MsEducationTv.com

**CLASS : 12th (Sr. Secondary)** **Code No. 2005**

**Series : SS-M/2017**

*रोल नं०* | | | | | | | | | | |

***SET : C***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh Candidates)

***(Evening Session)***

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/ पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशः*** —

(i) *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

(ii) *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

(iii) *श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

### खण्डः 'क'



Download from www.MsEducationTv.com

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितगद्यांशं पठित्वा निम्नांकितानां प्रश्ननानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखेयुः –

आसीत् पुरा कस्मिंश्चित् वने निसर्गरमणीयं शान्तं पवित्रं किमपि आश्रमपदम्। तत्र तपः परायणाः ऋषयः वसन्ति स्म। ऋषीणां तपः प्रभावात् परस्परं वैरभावम् अपहाय पशवः पक्षिणश्च निर्भयं तत्र विचरन्ति स्म। आसीत् तत्र वरतन्तुनामा कुलपतिः। तत्र अनेके मेधाविनः पटवश्च बटवः अपठन्। तेषु कश्चन आकृत्या मृदुलः प्रकृत्या सरलः कौत्सनामा बटुः आसीत् अयं बालः स्वल्पेनैव कालेन वेदानां वेत्ता, पुराणानां पठिता, दर्शनशास्त्राणां विज्ञाता चाभवत्।

***प्रश्नाः*** $5 \times 2 = 10$

(क) आश्रमपदं कीदृशम् आसीत् ?

(ख) आश्रमपदे के वसन्ति स्म ?

(ग) आश्रमे वरतन्तुः कः आसीत् ?

(घ) केषां प्रभावात् पशवः पक्षिणश्च आश्रमपदे विचरन्ति स्म ?

(ङ) कौत्सनामा बटुः केषां वेत्ता अभवत् ?

**खण्डः 'ख'**

**(रचनात्मक–कार्यम्)**

**2.** विषयमेकमधिकृत्य लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) समयस्य सदुपयोगः,

(ख) मम प्रियं पुस्तकम्,

(ग) संस्कृतभाषायाः महत्त्वम्।

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) गर्भेश्वरत्वमभिनवयौवनत्वम्, अप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा।

**अथवा**



Download from www.MsEducationTv.com

(ख) मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः सिन्दूरद्रवस्नातानामिव वरुण-दिगवलम्बिनामरुण- वारिवाहानामभ्यन्तरं प्रविष्टः।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ध्याचरन्कर्म परमाप्नोति पुरुषः।

**अथवा**

(ख) सहसा विदधीत न क्रियामविवेकः परमापदांपदम्।
वृणते हि विभृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।

**5.** अधोलिखिताषु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) अन्धन्तमः प्रविशन्ति ये अविद्यामुपासते।

(ख) उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।

(ग) कदाचित्वयं क्रूरः 'किन्तु' मुखस्य कवलमप्याच्छिनत्ति।

(घ) प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

श्रीनायारस्य दायित्वग्रहणस्य एकमासाभ्यन्तरे बहुदिनेभ्यः स्थगितानां विविधसमस्यानामपि समाधानं जातम्। स्वकार्यं त्यक्त्वा अपरस्य सहकारस्तस्य परमधर्मः।

***प्रश्नाः*** $2 \times 1 = 2$

(क) श्रीनायारस्य परमधर्मः कः आसीत् ?

(ख) 'तस्य' इति पदे का विभक्तिः किं वचनञ्च ?

**7.** अधोलिखितं मन्त्रं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तरे लेखनीये –

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

***प्रश्नाः*** $2 \times 1 = 2$

(क) शतं समाः कथं जिजीविषेत् ?

(ख) 'त्वयि' पदे कः शब्दः का विभक्तिश्च ?

**8.** रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत - $2 \times 1 = 2$



Download from www.MsEducationTv.com

(क) <u>पृथिव्या</u> सप्तभेदाः।

(ख) दिदेश <u>कौत्साय</u> समस्तमेव।

**खण्डः 'घ'**

**(संस्कृत-साहित्य–परिचयः)**

**9.** महाकविः बाणभट्टस्य **अथवा** दाराशिकोहस्य संक्षिप्तपरिचय हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 4

(i) पाषाणीकन्या,

(ii) सिंहासनद्वात्रिंशिका।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार–परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्रद्वयोः संस्कृतभाषया लक्षणोदाहरणौ लिखत — $2 \times 4 = 8$

(i) उपेन्द्रवज्रा,

(ii) वसन्ततिलका,

(iii) मन्दाक्रान्ता।

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – $2 \times 4 = 8$

(i) अनुप्रासः,

(ii) अतिशयोक्तिः,

(iii) श्लेषः।

**खण्डः 'च'**

**(अनुप्रयुक्त–व्याकरणम्)**

**13.** (क) यण्सन्धेः **अथवा** गुणसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) सम्प्रदानकारकस्य **अथवा** अधिकरणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) द्विगुसमासस्य **अथवा** बहुव्रीहिसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**खण्डः 'छ'**

**[ बहुविकल्पीय–वस्तुनिष्ठप्रश्नाः ]**



Download from www.MsEducationTv.com

**14.** अधस्तनप्रश्नानां लिखित्तोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 16 × 1 = 16

(क) 'तांस्ते' इति पदे कः सन्धिविच्छेदः ?

(i) तान् + ते (ii) तांस् + ते

(iii) तांन् + ते (iv) ताम् + ते

(ख) 'प्राप्तैव' इति पदे का सन्धिः ?

(i) वृद्धिसन्धिः (ii) गुणसन्धिः

(iii) यण्सन्धिः (iv) अयादिसन्धिः

(ग) 'त्वयि + एवम्' इति पदे किं सन्धिपदम् ?

(i) त्वयिवम् (ii) त्वयैवम्

(iii) तवैवम् (iv) त्वय्येवम्

(घ) 'अर्थकार्श्यम्' इति पदे विग्रहोऽस्ति –

(i) अर्थस्य कार्श्यम् (ii) अर्थात् कार्श्यम्

(iii) अर्थे कार्श्यम् (iv) अर्थम् कार्श्यम्

(ङ) 'महान् ऋषिः' इति विग्रहे किं समस्तपदम् ?

(i) महार्षिः (ii) मर्हषिः

(iii) महर्षिः (iv) माहर्षिः

(च) 'गुरूपदेशः' अत्र कः समासः ?

(i) कर्मधारयः (ii) अव्ययीभावः

(iii) बहुव्रीहिः (iv) तत्पुरुषः

(छ) 'तत्, पुल्लिंग, तृतीया, एकवचने रूपम्' –



Download from www.MsEducationTv.com

(i) तस्य (ii) तव

(iii) तेन (iv) तस्मात्

(ज) 'वित्तानाम्' इति पदे का विभक्तिः ?

(i) तृतीया (ii) षष्ठी

(iii) सप्तमी (iv) चतुर्थी

(झ) 'दास्यति' इति पदे कः धातुः ?

(i) यछ् (ii) यच्छ्

(iii) दा (iv) दाप्

(ञ) 'अपह्रियसे' इति पदे कः लकारः ?

(i) लट्लकारः (ii) लोटलकारः

(iii) लङ्लकारः (iv) लृट्लकारः

(ट) 'अध्यासितव्यम्' इति पदे कः प्रत्ययः ?

(i) तव्यत् (ii) यत्

(iii) शतृ (iv) शानच्

(ठ) 'स्वी + कृ + ल्यप्' एषां संयोगे किं रूपम् ?

(i) स्वीकारः (ii) स्वीकृतः

(iii) स्वीकृत्य (iv) स्वीकृत्यः

(ड) 'परितः' इति उपपदयोगे का विभक्तिः ?

(i) प्रथमा (ii) द्वितीया

(iii) तृतीया (iv) पञ्चमी

(ढ) 'विस्मृतः' इति पदस्य विलोमपदमस्ति –

(i) आस्मृतः (ii) स्मृतः

(iii) संस्मृतः (iv) निस्स्मृतः

(ण) 'सञ्चितम्' इति पदस्य विशेष्यम् –



Download from www.MsEducationTv.com

(i) धनम् (ii) बुद्धिः

(iii) दिवसम् (iv) रक्षणम्

(त) 'असारः' इति पदस्य समानार्थपदमस्ति –

(i) सारवान् (ii) सारभूतः

(iii) निस्सारः (iv) सारः



Download from www.MsEducationTv.com

CLASS : 12th (Sr. Secondary) **Code No. 2005**

**Series : SS-M/2017**

रोल नं० | | | | | | | | | | | **SET : D**

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh Candidates)

***(Evening Session)***

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

---

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

---

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

### खण्डः 'क'



Download from www.MsEducationTv.com

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितगद्यांशं पठित्वा निम्नांकितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखेयुः –

गङ्गाम् उभयतः विविधैः वृक्षैः सुशोभिताः ग्रामाः आसन्। तत्र एकस्मिन् ग्रामे एकः जीर्णः कूपः आसीत्। तस्मिन् कूपे मण्डूकानाम् अधिपतिः गङ्गादत्तः परिजनैः सह निवसति स्म। सः विनैव परिश्रमं प्रभुत्वं प्राप्नोत्। अतः गर्वितः अभवत्। तस्य दुर्व्यवहारेण केचित् प्रमुखाः भेकाः रुष्टाः जाताः। ते गङ्गादत्तं कूपात् बहिः कर्तुम् उद्यताः अभवन्। तद् ज्ञात्वा गंगादत्तः विषादम् अनुभवति स्म। ''शत्रूणां नाशः कथं भवेत्।'' इति एकान्ते चाटुकारैः सह मन्त्रणाम् अकरोत्।

***प्रश्नाः*** $5 \times 2 = 10$

(क) गङ्गामुभयतः के आसन् ?

(ख) मण्डूकानामधिपतिः कः आसीत् ?

(ग) सः कथं गर्वितः अभवत् ?

(घ) के गङ्गादत्तं कूपात् बहिः कर्तुम् उद्यताः अभवन् ?

(ङ) गंगादत्तः कैः सह मन्त्रणामकरोत् ?

**खण्डः 'ख'**

**(रचनात्मक–कार्यम्)**

**2.** विषयमेकमधिकृत्य लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) प्रातःकालीनभ्रमणम्,

(ख) स्वामी विवेकानन्दः,

(ग) ममप्रियः कविः।

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः सिन्दूरद्रवस्नातानामिव वरुण-दिगवलम्बिनामरुण-वारिवाहानामभ्यन्तरं प्रविष्टः।



Download from www.MsEducationTv.com

**अथवा**

(ख) श्रीनायारः केन्द्रसर्वकारतः स्थानान्तरणेन आगत्य ओडिशासर्वकारस्य अधीने प्रायः वर्षत्रयेभ्यः कार्यं करोति। तथाप्यस्मिन् वर्षत्रयात्मके कालखण्डे एकवारमपि स्वराज्यं केरलं प्रति गमनाय इच्छां न प्रकटितवान्।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात्।
दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम्।

**अथवा**

(ख) अस्ति यद्यपि सर्वत्र नीरं नीरज-राजितम्।
रमते न मरालस्य मानसं मानसं विना।।

**5.** अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषाया लेख्यम् – $2 \times 2 = 4$

(क) अपरिणामोपशमो दारुणो लक्ष्मीमदः।

(ख) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

(ग) तेन त्यक्तेन मुञ्जीथाः मा गृधः कस्यस्विद्धनम्।

(घ) स्वर्गभूमिं कुर्शीति वदन्ति।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

मनुष्याणां हिंसावृत्तिस्तु निरवधिः। पशुहत्या तु तेषाम् आक्रीडनम्। केवलं विक्लान्तचित्तविनोदाय महारण्यम् उपगम्य ते यथेच्छं निर्दयं च पशुघातं कुर्वन्ति।

*प्रश्नाः* $2 \times 1 = 2$

(क) पशुहत्या केषाम् आक्रीडनम् ?

(ख) 'ते' इति पदे का विभक्तिः किं वचनञ्च ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तरे लेखनीये –

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।

*प्रश्नाः* $2 \times 1 = 2$

(क) बुद्धियुक्तः के जहाति ?



Download from www.MsEducationTv.com

(ख) 'तस्मात्' इति पदे कः शब्दः का विभक्तिश्च ?

**8.** रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 2 × 1 = 2

(क) निष्क्रष्टुमर्थं चकमे कुबेरात्।

(ख) अतिजवेन दूरमतिक्रान्तः।

**खण्डः 'घ'**

**(संस्कृत-साहित्य–परिचयः)**

**9.** श्रीचन्द्रशेखरवर्मणः **अथवा** महाकविः बाणभट्टस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 4

(i) ईशावास्योपनिषद्,

(ii) श्रीमद्भगवद्गीता।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्रद्वेयोः संस्कृतभाषया लक्षणोदाहरणौ लिखत – 2 × 4 = 8

(i) अनुष्टुप्,

(ii) वसन्ततिलका,

(iii) शार्दूलविक्रीडितम्।

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8

(i) अनुप्रासः,

(ii) उत्प्रेक्षा,

(iii) व्याजस्तुतिः।

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**13.** (क) वृद्धिसन्धेः **अथवा** विसर्गसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2



Download from www.MsEducationTv.com

(ख) कर्त्ताकारकस्य **अथवा** सम्प्रदानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) अव्ययीभावसमासस्य **अथवा** द्विगुसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**खण्डः 'छ'**

**[ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]**

**14.** अधस्तनप्रश्नानां लिखित्तोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 16 × 1 = 16

(क) 'पित्रोक्तम्' इति पदे कः सन्धिविच्छेदः ?

(i) पित्रा + उक्तम् (ii) पितृ + उक्तम्

(iii) पितृ + क्त (iv) पितॄ + उक्तम्

(ख) 'तत् + धावतः' इति पदे किं सन्धिपदम् ?

(i) तत्धावतः (ii) तद्धावतः

(iii) तदधावतः (iv) तद्धावत

(ग) 'प्रत्युत्तरम्' इति पदे का सन्धि ?

(i) यण्सन्धिः (ii) अयादिसन्धिः

(iii) दीर्घसन्धिः (iv) गुणसन्धिः

(घ) 'महान्धकारः' इति पदे विग्रहोऽस्ति –

(i) महान् एव अन्धकारः (ii) महा अन्धकारः

(iii) महान् अन्धकारः (iv) महत् अन्धकारः

(ङ) 'कालस्य खण्डः तस्मिन्' इति विग्रहे किं समस्तपदम् ?

(i) कालखण्डः (ii) कालखण्डात्

(iii) कालखण्डे (iv) कालखण्डम्

(च) 'अहर्निशम्' अत्र कः समासः ?

(i) कर्मधारयः (ii) द्विगुः

(iii) तत्पुरुषः (iv) द्वन्द्वः

(छ) 'अस्मद्' प्रथमा, एकवचने रूपम् –



Download from www.MsEducationTv.com

(i) अहम् (ii) मया

(iii) वयम् (iv) आवाम्

(ज) 'शिशवः' इति पदे का विभक्तिः ?

(i) द्वितीया (ii) चतुर्थी

(iii) प्रथमा (iv) तृतीया

(झ) 'अनुवर्तते' इति पदे कः धातुः ?

(i) वृत् (ii) अनुवृत

(iii) अनु (iv) वर्त्

(ञ) 'पश्यन्ति' इति पदे कः लकारः ?

(i) लृट्लकारः (ii) लङ्लकारः

(iii) लोट्लकारः (iv) लट्लकारः

(ट) 'सिद्धम्' इति पदे कः प्रत्ययः ?

(i) क्त (ii) तल्

(iii) क्तवतु (iv) ल्यप्

(ठ) 'कृ + शानच्' एषां संयोगे किं रूपम् ?

(i) कुर्वाणः (ii) कुर्वन्

(iii) कुर्वत् (iv) कृतवान्

(ड) 'परितः' इति उपपदयोगे का विभक्तिः ?

(i) प्रथमा (ii) द्वितीया

(iii) तृतीया (iv) चतुर्थी

(ढ) 'गात्रम्' इति पदस्य समानार्थपदमस्ति –

(i) सततम् (ii) पातकम्



Download from www.MsEducationTv.com

(iii) शरीरम् (iv) कलुषम्

(ण) 'रूक्षः' इति पदस्य विशेष्यम् –

(i) दिवसः (ii) रात्रिः

(iii) व्यवहारः (iv) वृक्षः

(त) 'शत्रुता' इति पदस्य विलोमपदमस्ति –

(i) आर्जवम् (ii) समता

(iii) पटुता (iv) मित्रता



Download from www.MsEducationTv.com